# Shri Shadanana Stutih

# શ્રીષડાનનસ્તુતિઃ

## Document Information

Text title : ShaDAnanastutiH

File name : ShaDAnanastutiH.itx

Category : subrahmanya

Location : doc_subrahmanya

Proofread by : Sreenivasa Rao Bhagavatula

Description-comments : From stotrArNavaH 07-03

Latest update : February 11, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# શ્રીષડાનનસ્તુતિઃ

શ્રીગૌરીસહિતેશભાલનયનાદુદ્ભૂતમગ્ન્યાશુગ-
    વ્યૂઢં વિષ્ણુપદીપયશ્શરવણે સમ્ભૂતમન્યાદૃશમ્ ।
ષોઢાવિગ્રહસુન્દરાસ્યમમલં શ્રીકૃત્તિકાપ્રીતયે
    શર્વાણ્યઙ્કવિભૂષણં સ્ફુરતુ મચ્ચિત્તે ગુહાખ્યં મહઃ ॥ ૧॥

ત્રિષડકૃશદૃગબ્જષ્ષણ્મુખામ્ભોરુહશ્રીઃ
    દ્વિષડતુલભુજાઢ્યઃ કોટિકન્દર્પશોભઃ ।
શિખિવરમધિરૂઢઃ શિક્ષયન્ સર્વલોકાન્
    કલયતુ મમ ભવ્યં કાર્તિકેયો મહાત્મા ॥ ૨॥

યદ્રૂપં નિર્ગુણં તે તદિહ ગુણમહાયોગિભિર્ધ્યાનગમ્યં
    યચ્ચાન્યદ્વિશ્વરૂપં તદનવધિતયા યોગિભિશ્ચાપ્યચિન્ત્યમ્ ।
ષડ્વક્ત્રાષ્ટાદશાક્ષાદ્યુપહિતકરુણામૂર્તિરેષૈવ ભાતિ
    સ્વારાધ્યાશેષદુઃખપ્રશમનબહુલીલાસ્પદા ચાપ્યતુલ્યા ॥ ૩॥

યચ્છ્રીમત્પાદપઙ્કેરુહયુગલમહાપાદુકે સ્વસ્વમૂર્ધ્ના
    ધર્તું વિષ્ણુપ્રમુખ્યા અપિ ચ સુમનસઃ પ્રાગકુર્વંસ્તપાંસિ ।
તત્તાદૃક્સ્થૂલભૂતં પદકમલયુગં યોગિહૃદ્ધ્યાનગમ્યં
    શ્રીસુબ્રહ્મણ્ય સાક્ષાત્ સ્ફુરતુ મમ હૃદિ ત્વત્કટાક્ષેણ નિત્યમ્ ॥ ૪॥

યસ્ય શ્રીશમુખામરાશ્ચ જગતિ ક્રીડાં ચ બાલ્યોદ્ભવાં
    ચિત્રારોપિતમાનુષા ઇવ સમાલોક્યાભવંસ્તમ્ભિતાઃ ।
લોકોપદ્રવકૃત્સ નારદપશુર્યસ્યાભવદ્વાહનં
    સોઽસ્માન્ પાતુ નિરન્તરં કરુણયા શ્રીબાલષાણ્માતુરઃ ॥ ૫॥

યેન સાક્ષાચતુર્વક્ત્રઃ પ્રણવાર્થવિનિર્ણયે ।
કારાગૃહં પ્રાપિતોઽભૂત્ સુબ્રહ્મણ્યઃ સ પાતુ મામ્ ॥ ૬॥

કારુણ્યદ્રુતપઞ્ચકૃત્યનિરતસ્યાનન્દમૂર્તેર્મુખૈઃ

શ્રીશમ્ભોઃ સહ પઞ્ચભિશ્ચ ગિરિજાવક્ત્રં મિલિત્વામલમ્ ।
યસ્ય શ્રીશિવશક્ત્યભિન્નવપુષો વક્ત્રાબ્જષટ્કાકૃતિં
ધત્તે સોઽસુરવંશભૂધરપવિઃ સેનાપતિઃ પાતુ નઃ ॥ ૭॥

યઃ શક્ત્યા તારકોરઃસ્થલમતિકઠિનં ક્રૌઞ્ચગોત્રં ચ ભિત્ત્વા
હત્વા તત્સૈન્યશેષં નિખિલમપિ ચ તાન્ વીરબાહુપ્રમુખ્યાન્ ।
ઉદ્ધૃત્વા યુદ્ધરઙ્ગે સપદિ ચ કુસુમૈર્વર્ષિતો નાકિવૃન્દૈઃ
પાયાદાયાસતોઽસ્માન્ સ ઝટિતિ કરુણારાશિરીશાનસૂનુઃ ॥ ૮॥

યદ્દૂતો વીરબાહુઃ સપદિ જલનિધિં વ્યોમમાર્ગેણ તીર્ત્વા
જિત્વા લઙ્કાં સમેત્ય દ્રુતમથ નગરીં વીરમાહેન્દ્રનામ્નીમ્ ।
દેવાનાશ્વાસ્ય શૂરપ્રહિતમપિ બલં તત્સભાં ગોપુરાદીન્
ભિત્ત્વા યત્પાદપદ્મં પુનરપિ ચ સમેત્યાનમત્તં ભજેહમ્ ॥ ૯॥

યો વૈકુણ્ઠાદિદેવૈઃ સ્તુતપદકમલો વીરભૂતાદિસૈન્યૈઃ
સંવીત નસ્તો (સંવીતો યો નભસ્તો) ઝટિતિ જલનિધિં ધૌપથેનૈવ તીર્ત્વા ।
શૂરદ્વીપોત્તરસ્યાં દિશિ મણિવિલસદ્ધેમકૂટાખ્યપુર્યાં
ત્વષ્ટુર્નિર્માણજાયાં કૃતવસતિરભૂત્ પાતુ નઃ ષણ્મુખઃ સઃ ॥ ૧૦॥

નાનાભૂતૌઘવિધ્વંસિતનિજપૃતનો નિર્જિતશ્ચ દ્વિરાવૃ-
ત્ત્યાલબ્ધસ્વાવમાને નિજપિતરિ તતઃ સઙ્ગરે ભાનુકોપઃ ।
માયી યત્પાદભૃત્યપ્રવરતરમહાવીરબાહુપ્રણષ્ટ-
પ્રાણોઽભૂત્ સોઽસ્તુ (નિત્યં) વિમલતરમહાશ્રેયસે તારકારિઃ ॥ ૧૧॥

યેન કૃચ્છ્રેણ નિહતઃ સિંહવક્ત્રો મહાબલઃ ।
દ્વિસહસ્રભુજો ભીમઃ સસૈન્યસ્તં ગુહં ભજે ॥ ૧૨॥

ભૂરિભીષણમહાયુધારવક્ષોભિતાબ્ધિગણયુદ્ધમ (ણ્ડલઃ) ।
સિંહવક્ત્રશિવપુત્રયો રણઃ સિંહવક્ત્રશિવપુત્રયોરિવ ॥ ૧૩॥

શૂરાપત્યગણેષુ યસ્ય ગણપૈર્નષ્ટેષુ સિંહાનનો
દૈત્યઃ ક્રૂરબલોઽસુરેન્દ્રસહજઃ સેનાસહજૈર્યુતઃ ।
યુદ્ધે સ્છિન્નભુજોત્તમાઙ્ગનિકરો યદ્બાહુવજ્રાહતો
મૃત્યું પ્રાપ સ મૃત્યુજન્યભયતો માં પાતુ વલ્લીશ્વરઃ ॥ ૧૪॥

અષ્ટોત્તરસહસ્રાણ્ડપ્રાપ્તશૂરબલં મહત્ ।
ક્ષણેન યઃ સંહૃતવાન્ સ ગુહઃ પાતુ માં સદા ॥ ૧૫॥

અણ્ડભિત્તિપરિકમ્પિભીષણક્રૂરસૈન્યપરિવારપૂર્ણયોઃ ।
શૂરપદ્મગુહયોર્મહારણઃ શૂરપદ્મગુહયોરિવોલ્બણઃ ॥ ૧૬॥

નાનારૂપધરશ્ચ નિસ્તુલબલો નાનાવિધૈરાયુધૈ-
    ર્યુદ્ધં દિક્ષુ વિદિક્ષુ દર્શિતમહાકાયોઽણ્ડષણ્ડેષ્વપિ ।
યઃ શક્ત્યાશુ વિભિન્નતામુપગતઃ શૂરોઽભવદ્વાહનં
    કેતુશ્ચાપિ નમામિ યસ્ય શિરસા તસ્યાઙ્ઘ્રિપઙ્કેરુહે ॥ ૧૭॥

કેકિકુક્કુટરૂપાભ્યાં યસ્ય વાહનકેતુતામ્ ।
અદ્યાપિ વહતે શૂરસ્તં ધ્યાયામ્યન્વહં હૃદિ ॥ ૧૮॥

દેવૈઃ સમ્પૂજિતો યો બહુવિધસુમનોવર્ષિભિર્ભૂરિહ
    ત્રાહિ સ્વર્ગલોકે વિપુલતરમહાવૈભવૈરભ્યષિઞ્ચત્ ।
તદ્દત્તાં તસ્ય કન્યાં સ્વયમપિ કૃપયા દેવયાનામુદૂહ્ય
    શ્રીમત્કૈલાસમાપ દ્રુતમથ લવલીં ચોદ્વહંસ્તં ભજેઽહમ્ ॥ ૧૯॥

તત્રાનન્તગુણાભિરામમતુલં ચાગ્રે નમન્તં સુતં
    યં દૃષ્ટ્વા નિખિલપ્રપઞ્ચપિતરાવાઘ્રાય મૂર્ધ્ન્યાદરાત્ ।
સ્વાત્માનન્દસુખાતિશાયિ પરમાનન્દં સમાજગ્મતુઃ
    મચ્ચિત્તભ્રમરો વસત્વનુદિનં તત્પાદપદ્માન્તરે ॥ ૨૦॥

દુષ્પુત્રૈર્જનની સતી પતિમતી કોપોદ્ધતૈઃ સ્વૈરિણી-
    રણ્ડાસીત્યતિનિન્દિતાપિ ન તથા ભૂયાદ્યથા તત્ત્વતઃ ।
દુષ્પાષણ્ડિજનૈર્દુરાગ્રહપરૈસ્સ્કાન્દં પુરાણં મહત્
    મિથ્યેત્યુક્તમપિ ક્વચિચ્ચ ન તથા ભૂયાત્તથા સત્યતઃ ॥ ૨૧॥

કિં તુ તદ્દૂષણાત્તેષામેવ કુત્સિતજન્મનામ્ ।
ઐહિકામુષ્મિકમહાપુરુષાર્થક્ષયો ભવેત્ ॥ ૨૨॥

યત્સંહિતાષટ્કમધ્યે દ્વિતીયા સૂતસંહિતા ।
ભાતિ વેદશિરોભૂષા સ્કાન્દં તત્કેન વર્ણ્યતે ॥ ૨૩॥

યસ્ય શમ્ભૌ પરા ભક્તિર્યસ્મિન્નીશકૃપામલા ।
અપાંસુલા યસ્ય માતા તસ્ય સ્કાન્દે ભવેદ્રતિઃ ॥ ૨૪॥

ષડાનનસ્તુતિમિમાં યો જપેદનુવાસરમ્ ।
ધર્મમર્થં ચ કામં ચ મોક્ષં ચાપિ સ વિન્દતિ ॥ ૨૫॥

॥ ઇતિ શ્રીષડાનનસ્તુતિઃ સમ્પૂર્ણા ॥

Proofread by Sreenivasa Rao Bhagavatula

*Shri Shadanana Stutih*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*